શ્રી યશોવિજયજી
જૈન ગ્રંથમાળા
દાદાસાહેબ, ભાવનગર.
ફોન : ૦૨૭૮-૨૪૨૫૩૨૨
૩૦૦૪૮૪૬
1202

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

1202 3012

# आत्मतत्त्वप्रकाशः

न्यायविशारद–न्यायतीर्थ–
मुनिश्रीन्यायविजय–
विरचितः

वि. सं. २०१०–मार्गशीर्षः

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

## उपक्रमः ।

जगत् किंस्वरूपमिति विचार्यमाणं जड–चेतनरूपतत्त्वद्वयमात्रं प्रतीयते । नास्त्येतद्द्वयातिरिक्तं तत्त्वम् । विश्वविश्वविश्वपदार्था अस्मिन् द्वयेऽन्तर्भवन्ति । जडरूपं च चेतनरूपं चेति द्विधा विभज्यते द्रव्यम् ।

यत्र चैतन्यं नास्ति तज्जडतत्त्वम् । तद्विपरीतं चैतन्यरूपं चेतनतत्त्वम् । चेतनो जीव आत्मा इत्यनर्थान्तरम् । ज्ञानशक्तिस्तल्लक्षणम् ।

## जीवः ।

जीवोऽन्यपदार्थवन्न दृश्यते प्रत्यक्षम् । परन्तु स्वानुभवप्रमाणेन शक्यते ज्ञातुम् । 'अहं सुखी,' 'अहं दुःखी' इत्यादिरूपं संवेदनं शरीरस्य पृथिव्यादिभूतमूर्तित्वेन जडत्वान्न भवितुमर्हति । इच्छा–भावनादयो गुणा मृतकशरीरे न सन्तीति सर्वप्रतीतम्, अतस्ते गुणा न शरीरस्य, किन्तु तत्त्वान्तरस्येति प्रतीयते । तच्च तत्त्वान्तरमात्मा । घटपटाद्यन्यभौतिकजडपदार्थेष्विव भौतिकजडशरीरे ज्ञानेच्छाभावनादिधर्मधर्मित्वं न भवितुमर्हति । अतस्तदाधार आत्मा । अमूर्तं ज्ञानं मूर्तानां भूतानां गुणो भवितुं नार्हति, तत् कथं भौतिकशरीरस्य गुणः स्यात् ?

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

शरीरे पञ्चेन्द्रियाणि सन्ति, परन्तु तानि साधनतयोपयुञ्जान आत्मा तेभ्यो भिन्न एव। आत्मा हि तै रूपरसादिविषयान् गृह्णाति। चक्षुषा रूपं पश्यति, रसनया रसं रसयति, घ्राणेन गन्धं जिघ्रति, श्रवणेन शब्दं शृणोति, त्वचा च स्पृशति। यथा लेखनीछुरिकया ( Pen-knife ) लेखनीं निर्मिमीते मणिलालः, तत्र लेखनीछुरिका निर्माता च भिन्नावेव; दात्रेण लुनाति सहदेवः, तत्र दात्रं लविता च भिन्ने एव; दीपेन पश्यति कान्तिलालः, तत्र दीपो द्रष्टा च पृथगेव; तथा इन्द्रियै रूपरसादिविषयग्रहणेषु इन्द्रियग्रामो, विषयग्रहीता च भिन्नावेव। साधकः स्वकार्यसाधने साधनमपेक्षते, उपयुङ्क्ते च, परन्तु एतावता साधकसाधनयोरेकत्वं न स्यात्। ते भिन्ने एव भवतः। इन्द्रियाण्यात्मनो ज्ञानप्राप्तौ साधनभूतानि, अतो विषयग्रहण-साधनभूतेभ्यस्तेभ्यो विषयग्राहक आत्मा भिन्न एव भवति।

मृतशरीरे सत्स्वपि करणेषु मृतकस्य तद्द्वारा न किमप्युपजायते ज्ञानम्, अतो ज्ञायते इन्द्रियाणि तद्द्वारा च रूपादिविषयग्राहक आत्मा पृथगेवेति। इन्द्रियाणामात्मत्वेऽभ्युपगम्यमाने तानि पञ्चेत्येकस्मिन् देहे पञ्चात्मानः प्रसज्येरन्, तच्चाघटितम्।

यस्य चक्षुरुपहतं सोऽन्धीभूतोऽपि प्राक् चक्षुःसद्भावदशायां दृष्टान् भावान् स्मरति—दृष्टपूर्वाः पदार्थास्तस्य स्मृतिमुपतिष्ठन्ते। इदं कः करोति स्मरणम्? चक्षुः? तत् तु नास्ति। किं तर्हीन्द्रियान्तरम्? न। एकेन ह्यनुभूतं दृष्टं वा नान्यः शक्नोति स्मर्तुम्। अतश्चक्षुषा दृष्टं तदन्यकरणेन न शक्यते स्मर्तुम्। य एव यस्य अनुभविता द्रष्टा वा स एव तस्य स्मर्ता इति हि न्यायः। एवं च चक्षुषा दृष्टानां तद्विरहेऽपि स्मरणं यद् भवति तदेवेन्द्रियातिरिक्त-रूपेणात्मनोऽस्तित्वं गमयति। आत्मा हि चक्षुःसद्भावदशायां तद्-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

द्वारा स्वदृष्टानां वस्तूनां तद्विरहेऽपि तद्भूतपूर्वदर्शनानुभवस्थापित-संस्कारसमुद्बोधनबलेन स्मरणं कर्तुं शक्नोति। इत्थमनुभवस्मरणयोः परस्परघनिष्ठसामानाधिकरण्यसम्बन्धबलेनापि चैतन्यरूपं स्वतन्त्र-मात्मतत्त्वमुपपद्यते ।

'अहममुकं वस्तु दृष्ट्वा अस्प्राक्षम्, ततोऽघ्रासिषम्, ततश्चार-रसम्' इत्येवम्भूतोऽनुभवो यदा-तदाऽस्माकं भवन् स्पष्टमवगमयति तस्य वस्तुनो द्रष्टा, स्पर्ष्टा, घ्राता, रसयिता च भिन्ना न सन्ति, किन्तु एक एवेति। कः खल्वेकः सः ? चक्षुः ? न, तस्य हि कार्यं केवलं दर्शनमस्ति, न स्पर्शनादि। एवमेव स्पर्शनमात्रप्रवणं त्वगिन्द्रियं, घ्राणमात्रपरायणं घ्राणं, रसनमात्रनियतं रसनं च न। सर्वप्रतीताद् अस्मादनुभवाद् द्रष्टा, स्प्रष्टा, घ्राता, रसयिता च य एकोऽस्ति स इन्द्रियातिरिक्त आत्मा इति समवसीयते ।

आधुनिकवैज्ञानिकान्वेषणसिद्धेषु द्वानवतौ तत्त्वेषु नैकतममपि तत्त्वं स्वसंवेदनक्षमम्। अतः स्वसंवेदनात्मकं तत्त्वं तद्भिन्नमुपपद्यते, तस्य च सङ्गच्छमानं स्थेमानमाश्रित्य पुनर्जन्मापि।

आत्मा वर्णरहित इति बाह्यभौतिकवस्तुवन्न भवति प्रत्यक्षः। एतावता स नास्तीति वक्तुमसाम्प्रतम्। परमाणवश्चर्मचक्षुषा न दृश्यन्ते, तथापि स्वीक्रियन्ते। स्थूलकार्योत्पत्तिः परमाणुसंघातमपे-क्षते इत्यनुमया तत्सत्त्वमुपपद्यते। परमाणवो मूर्ता [रूपिणः-] अपि सन्तः प्रत्यक्षा न भवन्ति, तर्हि अमूर्तोऽरूप्यात्मा सुतराम-प्रत्यक्षो भवेदेवास्मदादीनामित्यत्र किमाश्चर्यम् ? कार्यद्वारा परमाणवो यदि प्रत्यक्षायमाणाः शक्यन्ते वक्तुम्, तदा आत्मापि तस्य प्रत्यक्षेण ज्ञानरूपकार्येण शक्यते वक्तुं प्रत्यक्ष इति। यस्य धर्माः प्रत्यक्षाः स प्रत्यक्ष इति हि न्यायः। अत एव शब्दो नाकाशगुणो भवितुमर्हति।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

शब्दस्य हि प्रत्यक्षत्वेनाकाशस्य प्रत्यक्षविषयत्वमापद्येत; अथवा आकाशस्याप्रत्यक्षत्वेन शब्दस्य ( श्रावण ) प्रत्यक्षत्वं विहन्येत । शब्दस्य भौतिकद्रव्यरूपत्वं चेदानीन्तनेन 'स्वरवाहक' [ Phonograph] यन्त्रेण स्पष्टं स्थापितम् । वायुस्तत्स्पर्शप्रत्यक्षानुभवद्वारा उच्यते प्रत्यक्षः ।

किञ्च कश्चिद् धीमान्–कश्चिन्मूर्खः, कश्चित् स्वामी–कश्चित् सेवकः, कश्चिच्छ्रेष्ठी–कश्चन कर्मकरः, कश्चिद् धनी–कश्चिद् दरिद्रः, कश्चित् स्वस्थ-सुरूपः–कश्चिदस्वस्थ-विरूपः, कश्चिदामयावी – कश्चिन्निरामयः, एवं कश्चन सुखी-कश्चन दुःखी, इत्यादयोऽनन्तवैचित्र्यो विश्वे विलोक्यन्ते, नामूरकारणं भवितुमर्हन्ति । प्रचुरप्रयत्नतोऽपि प्रज्ञावतोऽपि न निर्वर्तते स्वमीहितम् , अन्यस्य च तदनायासेन सम्पद्यतेऽल्पायासेन वा । ईदृशोऽनेकघटना अस्मद्दृष्टिसमक्षमुपजायमाना उपलभ्यन्ते । एकस्या एव योषितः कुक्षितः सहजातयुगलस्य जीवनयात्रे अतिविभिन्ने, अतिविपरीते अपि प्रवर्तमाने दृश्येते । समानतया पालितपोषितानामपि महान् बुद्धिभेदो दृश्यते, जीवनवहनं च परस्परविरुद्धरूपम् । तेजस्विनस्तनयो निस्तेजाः, निस्तेजसश्च सुतेजा भवति । किमत्र कारणम् ? न तत् कारणं केवलपार्श्ववर्तिपरिस्थितिष्वेव पर्याप्तं स्यात् । सावधानं गच्छत्यपि वर्तमानेऽपि वा वानराद्याकस्मिकोपद्रवसमुत्थेष्टकादिप्रपतनसम्भूतमन्यविधं वाऽऽकस्मिकमत्याहितमापतति, किमत्र कारणम् ? निरपराधेनापि मिथ्याभियुक्तीभूय घोरयातनात्मकः प्राणान्तरूपो वा दण्डो भोक्तव्यो भवति, वास्तवापराधी च तिरोभूत्या शाठ्यपूर्णवाग्जालबलेन वा अपराधदण्डमभुक्त एवावतिष्ठते, किमत्र कारणम् ? गर्भारम्भत आरभ्य जन्मपर्यन्तं कष्टं यदनुभवति भ्रूणस्तत्

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

स्वकृतिहेतुकं वा तन्मातरपितरकृतिहेतुकं वा ? इत्यपि विचारास्पदमुपतिष्ठते । तत्र न तावदाद्यो विकल्पः समर्थः, गर्भावस्थायां हि न किमपि तेन कृतमस्ति शुभाशुभम् । नापि द्वितीयः, न हि अन्यकर्मफलमन्यो भुञ्जीत । अकारणं तु तन्न भवितुमर्हति । किमत्र कारणम् ? ईदृशं प्राणिजगतो बहुबहुविधवैचित्र्यं दृश्यमानं निर्हेतुकमनियामकं वा तु कथं स्यात् ? किञ्चित् मूलप्रयोजकतत्त्वं तु तत्पृष्ठभूमाववश्यं स्यात् । ईदृग्विचारसरणिमाश्रित्य बहुश्रुतमेधाविनोऽनुमिमते पूर्वजन्मानुसंहित-कर्मसत्ताम् । समर्थितायां च तस्यां तदावृतमात्मतत्त्वं सिद्धमेव । आत्मा हि सुखदुःखदकर्मपुञ्जेन अनादिसमभिसम्बद्धोऽस्ति । तन्निघ्नमेव च तस्य [ आत्मनो ] भवभ्रमणं नानाविधदशापरिवर्तनचक्रं वा । इत्थं कर्मण्यात्मनि चोपपद्यमाने परलोक ( पुनर्जन्म )-सिद्धान्तः स्वतस्तत्संयुक्त एव समुपतिष्ठते । प्राणिभिः क्रियमाणाः सदसत्यः क्रिया नहि निष्फला भवितुमर्हन्ति । यद्यपीह जन्मनि दृश्यन्ते काश्चिदफलेग्रह्यस्ताः, तथापि जन्मान्तरे ताः (स्वस्थापितसंस्कारेण) स्वफलमुपनयेरन् । प्राणिनां स्वक्रियोत्तरदायित्वत एव कर्मणस्तत्सम्बद्धात्मनः, परलोकस्य च सिद्धान्तः समर्थितो भवति । यद्विधानि हि सदसन्ति कार्याणि प्राणी करोति तदनुरूपं फलं तदनुरूपफलानुसारिणीं वा पुनर्जन्मगतिमवाप्नोति । यथा भोजन-पानं शरीरान्तर्गत्वा स्वोचितपरिणाममुपजनयति, तथा क्षणिका अपि क्रियाः स्वसंस्कारमादधते [ जीवे ] । आधाय चोपरमन्ति । एष संस्कारोऽथवा वासना एव 'कर्म' । तच्चैकविभिन्नप्रकारकपरमाणुद्रव्यसंघातात्मकमेके समामनन्ति महर्षयः । एवंविधानि नवनवानि कर्माणि आत्मक्रियावशादात्मना संयुज्यन्ते, पुराणानि च स्वावधिसमाप्तौ विशीर्यन्ते । सदसत्कार्यतो बद्धानि सदसन्ति कर्माणि परलोकपर्यन्तम्, अनेक-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

जन्मपर्यन्तमपि वात्मनि फलानुभावनमन्तरेण* 'सत्ता' रूपेणावतिष्ठन्ते; फलविपाकोदयसमये चोदित्य मिष्टानि कटूनि वा स्वफलानि जीवमनुभावयन्ति। फलविपाकभोगावधिं यावत् तानि फलानि जीवोऽनुभवति। भुक्तानि च तानि कर्माणि जीवाद् विघटन्ते।

एतादृशप्रमाणावष्टम्भेन तथा 'सुख्यहम्', 'दुःख्यहम्' इत्याद्याकारकेण—नहि शरीरे, न चेन्द्रियेषु, किन्त्वन्तरात्मनि स्पष्टमनुभूयमानेन—प्रत्यक्षरूपेण संवेदनेनापि देहेन्द्रियादिविभिन्नं स्वतन्त्रमात्मतत्त्वमुपपद्यमानमवसीयते।

## जीवभेदाः।

जीवा द्विधा-संसारिणो मुक्ताश्च। संसारे–भवे [भवचक्रे] भ्रमणकर्तारः संसारिण उच्यन्ते। 'संसार' शब्दः 'सम्'–पूर्वक 'सृ' धातुतो निष्पन्नः। 'सृ' धातोरर्थो गमनं–भ्रमणम्। 'सम्' उपसर्गस्तमेवार्थं पुष्णाति। इत्थं संसारस्यार्थो निष्पन्नो भ्रमणम्। चतुरशीतौ लक्षेषु योनीनाम्, चतसृषु वा गतिषु [मनुष्य-तिर्यक्–स्वर्ग–नरकगतिषु] परिभ्रमणं संसारः, परिभ्रमणकर्तारश्च संसारिणोऽभिधीयन्ते। प्रकारान्तरेण 'संसार' शब्दस्यार्थो भ्रमणभूमयो योनयो गतयो वाऽपि भवन्ति। 'संसार' शब्देन शरीरमपि गृह्यते। एवंरीत्या संसारमास्थिताः प्राणिनः संसारिण उच्यन्ते। 'संसार' शब्दस्य मूलभूतोऽर्थ आत्मनः कर्मबद्धावस्था। तदेव च संसारिजीवस्य लक्षणम्।

---

* आचार्यहरिभद्रेण शास्त्रवार्तासमुच्चये चतुर्थस्तबके बुद्धोद्गाररूपेणोपन्यस्तोऽयं श्लोकः—

"इत एकनवते कल्पे शक्त्या मे पुरुषो हतः।
तेन कर्मविपाकेन पादे विद्धोऽस्मि भिक्षवः!॥१२४॥"

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

संसारिजीवानां भिन्नभिन्नरीत्या अनेकविधा भेदा निर्दिश्यन्ते। परन्तु मुख्यतया सूक्ष्माः स्थूलाश्चेति ते द्विधा। सूक्ष्माः पृथ्वी–जल–तेजो–वायु–वनस्पतिकायाः पञ्चधा। ते 'स्थावरा' अप्युच्यन्ते। ते स्पर्शनलक्षणैकेन्द्रियाः सन्त एकेन्द्रियाः। ते अदृश्या दृश्याश्चेति द्वेधा। अस्मत्करणागम्यैरत्यन्तसूक्ष्मैरदृश्यैस्तैः समग्रलोको घन–सान्द्रं संव्याप्तो वर्तते। दृश्याः पृथ्वी–जल–तेजो–वायु–वनस्पतिकायास्तु प्रत्यक्षमुपलभ्यन्ते, उपयुज्यन्ते, उपभुज्यन्ते च। घर्षणच्छेदनादिप्रहारमप्राप्ता मृत्प्रस्तरादिः पृथ्वी येषां जीवानां शरीरपिण्डस्ते दृश्यपृथ्वीकायाः। अनलाद्याघातमनुपगता वापी–कूपा–ऽऽपगा–तडागाद्यापो येषां जीवानां कायपिण्डस्ते दृश्यजलकायाः। दीप–दहन–विद्युदादि तेजो येषां जीवानां पुद्गलपिण्डस्ते दृश्यतेजस्कायाः। अनुभूयमानो वायुर्येषां जीवानां देहपिण्डस्ते दृश्यवायुकायाः। वृक्ष–शाखा–प्रशाखा–पत्र–पल्लव–पुष्प–फल–कन्दादिवनस्पतयो येषां जीवानां वपुष्पिण्डस्ते दृश्यवनस्पतिकायाः। *

उक्तसचेतनपृथ्वी यदा छेदन–भेदनाद्याघाततस्तद्गतजीवास्ततश्च्यवन्ते, तदा अचेतना भवति। एवमाप उष्णीकरणेन, शर्करादिमिश्रीक्रियया वा अचेतना भवन्ति। वनस्पतयोऽप्येतया रीत्या अचेतनीभवन्ति।

त्वग्–जिह्वे द्वे इन्द्रिये दधतो द्वीन्द्रियाः। ते कृमि-शङ्ख-कपर्द-

---

* वनस्पतिषु सचेतनत्वं विज्ञानविशारदश्रीजगदीशचन्द्रवसुमहाशयेन विज्ञानप्रयोगतः प्रमाणितमस्ति। समग्राकाशोदरं सूक्ष्मजीवैर्घन-खचितमस्तीत्याधुनिकवैज्ञानिकमतम्! वैज्ञानिकान्वेषणानुसारेण "थेक्रसस्" नामा जन्तुरियल्लघुरस्ति यत् ते जन्तव एकसूच्यग्रकोटावेकलक्षमप्यनाबाधमवतिष्ठेरन्।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

शुक्तिका-गण्डूपद-जलूकादयः। यूका-मत्कुण-मत्कोटक-लिक्षा-पिपीलिका-कुन्थु-घृतेल्यादयस्त्वग्-जिह्वा-घ्राणतस्त्रीन्द्रियाः। त्वग्-जिह्वा-घ्राण-नेत्रैश्चतुरिन्द्रियाः पतङ्ग-मक्षिका-भ्रमर-दंश-मशक-वृश्चिकादयः। त्वग्-जिह्वा-घ्राण-नेत्र-श्रोत्राणि पञ्चेन्द्रियाणि धारयन्तः पञ्चेन्द्रियाः। ते चतुर्धा। मत्स्योरगभुजगपक्षिचतुष्पदास्तिर्यग्योनिजाः, सर्वे च मनुष्याः, स्वर्गभूमयो देवाः, नरकभूमयो नारकाश्च।

स्थूलेषु द्वीन्द्रिय-त्रीन्द्रिय-चतुरिन्द्रिय-पञ्चेन्द्रिया गृह्यन्ते। ते 'त्रसा' अप्युच्यन्ते। इत्थं सूक्ष्म-स्थूलेषु [स्थावर-त्रसेषु वा] जीवेषु समग्रसंसारिजीवराशयः समाविशन्ति।

## मोक्षः।

अथ मुक्तजीवाः। ते मुक्तिं प्राप्ताः। मुक्तिश्च समग्रकर्मावरणेभ्यस्तदुत्थशरीरादिभ्यश्चात्यन्तिकी मुक्तिः। सा च केवलशुद्धात्मावस्था। अत एव सा कैवल्यमप्युच्यते।

न सन्ति यत्र देहेन्द्रियाणि वनिता-विभवाश्च तत्र किं सुखं भवेत्? इत्यारेकमाणः कथं विस्मरति एते विषया [विषयवासना] एव दुःखमूलम्? सा वासना खलु सन्तापस्वभावा। तस्यां सत्यां कुतः सुखम्? तद्रहितप्रशमावस्थैव यथार्थसुखम्। सरसाशनपानसमास्वादनेऽनुभूयमान आनन्दोऽशनायानिबन्धनः। पूर्णोदराय न रोचते पीयूषदेशीयमप्यशन-पानम्। शीतार्ति-परिहाराय गृह्यमाणमंशुकं निदाघे कष्टायमानं भवति। बह्वासित उत्तिष्ठासति, अटिटिषति च। चाचल्यमानश्चोपविविक्षति, विशिश्रमिषति च। आदावनुकूलायमाना कामक्रिया अन्ते प्रतिकूलायते। ईदृशः खल्विमा वैषयिकस्थितयः। सुखसाधनत्वेन प्रतीयमाना भङ्गुरपदार्था भङ्गुरशान्तिं विहाय किमुपजनयन्ति सुखम्?। पक्वः स्फोटो यदा स्फुटति तदा "हा...श"-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

रूपतो यत् संवेद्यते सुखं तद् वेदनोपशमव्यतिरिक्तमस्ति किञ्चित्? तथैव विषयानुषङ्गे प्रतीयमानं सुखं वेदनोपशान्तिमन्तरेण नास्ति किञ्चित्।* शान्तिरप्यसौ कियच्चिरमवस्थास्नुः? सद्य एव अल्पक्षणान्तरे वा विलीयते; उत्तिष्ठति च पुनराक्रममाणमशान्तवातावरणम्। अल्पक्षणाप्यसौ शान्तिर्ग्लानिविमुक्ता नास्ति, अल्पैवास्ति।

कियदुल्बणाश्च जगति रागद्वेषोत्पाताः कामक्रोधज्वालाश्च? कियदुद्दामानि च रोगशोकाक्रमणानि? एषा स्थितिः किं सुखात्मा? शान्ति–तृप्तिमात्रापेक्षया अशान्त्यतृप्तिमात्रा न सन्ति किम्वत्यधिकतराः?

विषयसम्पर्कोऽशक्य एव खलु दूरीकर्तुम्, तथापि तदासक्तिमता न भाव्यम्; भाव्यं चाकर्षक–प्रलोभकेभ्यः, पातनकारितया च सम्भाव्यमानेभ्यो भासमानेभ्यो वा विषयेभ्यः सावधानीभूय दूरवर्तिना, इत्येव परमार्थः। जीवननिर्वाहो देहवतां निसर्गाऽऽपतितो विधेय एव भवति। यथा स्वस्थमश्वादिवाहनं दूर–सुदूरं नेतुमलंकर्मीणं भवति, तथा स्वस्थं शरीरमात्मन ऊर्ध्वंगमनतये उपयोगि भवति। अतः समपेक्षितमस्ति तदीयस्वास्थ्यम्। आहारविहारप्रमादसम्भूतरोगाक्रान्तं विषयभोगासक्तिसमुत्थनैर्बल्यपराहतं वा शरीरं जीवनयात्रिणां महदनिष्टमभद्रम्। "धर्मार्थकाममोक्षाणा–

---

* यदाह वैराग्यशतके भर्तृहरिः—

तृषा शुष्यत्यास्ये पिबति सलिलं स्वादु सुरभि
क्षुधार्तः सन् शालीन् कवलयति शाकादिवलितान्।
प्रदीप्ते कामाग्नौ सुदृढतरमाश्लिष्यति वधूं
प्रतीकारं व्याधेः सुखमिति विपर्यस्यति जनः॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मारोग्यं मूलमुत्तमम्" इति हि अगदङ्कारधौरेयमहदनुशासनम्। अतो न्याय्यव्यवसायश्रमोपार्जितशुचिद्रव्यतः समुचितजीवन-निर्वाहं समुचितसंयमसहकृतमवलम्ब्य परमादर्शपथविहार-परायणेन भवितव्यमित्यनुशासति जीवनशिक्षां धर्मशास्तारः।

शरीरयोगोऽवश्यमल्पाधिकदुःखसहचरः, तथापि अहिंसासत्य-रूपकुशलकर्तव्यपरायणः कल्याणीबुद्धिस्तात्त्विककल्याणसमभिलाषुकः परमादर्शबद्धलक्ष्यः सज्जनोऽन्तःप्रशमसुखमनुबोभूयमानो बाह्यान्तर-प्रातिकूल्यदुःखसमापतनप्रभावाविष्टमना न भवति। सुदृढधैर्यतः श्रेयोवर्त्मनाऽधिकाधिकं सञ्चरमाणोऽधिकाधिकमात्मजीवनविकासं निर्वर्तयति। क्रमेण च समुन्नतकल्याणभूमिमधिरुह्य इहैव देहे मुक्तदशामवाप्नोति, मृत्वा च परमनिर्वाणम्।

कण्डूमानेव कण्डूयनेऽभिमन्यते आनन्दसुखम्, अन्यस्य तत्र रुचिर्भवेदेव कुतः? तथैव मोहवासनाक्रान्तस्यैव मोहचेष्टा मिष्टा भासते, अन्येषां वीतरागात्मनां कथमसौ रोचेत? वैषयिकमोह-वृत्तिः कण्डूवद् आदौ कञ्चिदानन्दं दर्शयन्त्यपि परिणामे परिताप-जननी। ईदृशी कण्डूः सुज्ञ–धीराणामुपरमति। उपरततादृशकण्डूया महानुभावा आत्मयोगपथे उत्तरोत्तरमुन्नमन्तोऽन्ते पूर्णवीतरागा भवन्ति। इदमेव परमोत्कर्षशालि कल्याणपदं परमधाम। पूर्णात्म-नैर्मल्यसम्भूतमेतदवस्थासुखमेव वास्तवं पूर्णं च सुखम्।

## मानवजीवनमहिमा।

मोक्षप्राप्तिश्च मनुष्यशरीरद्वारा भवति। मनुष्यभूमिरेव आत्म-विकासस्य परममुत्कर्षमधिरोढुमुपयोगिनी।

उक्तं च—

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

" Man is the master of the whole cosmos. If you are not man, be man; if you are an angel, descend to manhood; if you are an animal, ascend to manhood."

अर्थात्—मनुष्यः खलु समग्रविश्वस्वामी। यदि त्वं नाऽसि मानवः, भव मानवः। यदि त्वं स्वर्गसद्, मानवभूमिमवतर। यदि त्वं पशुः, मानवभूमीमधिरोह।

परमतपस्विनः, परमयोगिनः, परमज्ञानिनो वा मनुष्यगतावेव (मनुष्या एव) भवन्ति, ये हि सकललोकमूर्धन्यैर्महद्भिरपि अभिनता अभिनुता अभ्यर्चिताश्च भवन्ति।

महाकवि 'शेक्सपियर्' महाशयः स्व 'हेम्लेट्' नाटके प्राह–

" What a piece of work is man ! How noble in reason ! How infinite in faculty ! In form and moving how express and admirable ! In action how like an angel ! The beauty of the world......the paragon of animals."

अर्थात्—मनुष्यः कीदृशी कर्ममयी कृतिः ! विचारबुद्धिसम्पत्तावसौ कीदृङ् महान् ! शक्तौ कीदृगपारः ! आकारे विहारे च कीदृग् विशिष्टः स्तुत्यश्च ! कर्मणि कीदृग् देवोपमः ! असौ विश्वसौन्दर्यम् प्राणिष्वादर्शप्रतिमा च।

मनुष्यात्मा मुक्तिमार्गे विहरमाण उच्चैःक्रममाणो यदा वीतरागचारित्रस्य परां काष्ठामधिष्ठितो भवति तदा तत्कर्मावरणानामुच्छेदेन निरावरणीभूय पूर्णप्रकाशः पूर्णात्मा भवति। सदेहावस्थाया-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

मसौ जीवन्मुक्त उच्यते, मृत्यनन्तरं विदेहदशामापन्नो निराकार-पूर्णपरब्रह्मात्मा भवति ।

## मोक्षस्यानन्त्यम् ।

न खलु मोक्षः किञ्चिदुत्पदिष्णु वस्तु । कर्मावरणबन्धतो हि मुक्तिरेव मोक्षः । अभ्रापसरणे यथा ज्योतिर्मय आदित्यः प्रकाशमानः प्रकटीभवति, तथा कर्मावरणापसरणे सच्चिज्ज्योतिस्स्वरूप आत्मा सकलस्वरूपेण प्रकाशमानः प्रकटीभवति । एष एव —स्वस्वरूपाविर्भाव एव मोक्षः । एष नित्य—स्थास्नुरनन्त इति दार्शनिकवृन्दारकाणां मतम् ।

यदाह महर्षिः श्रीउमास्वातिस्तत्त्वार्थाधिगमशास्त्रे—

"दग्धे बीजे यथाऽत्यन्तं प्रादुर्भवति नाङ्कुरः ।
कर्मबीजे तथा दग्धे न रोहति भवाङ्कुरः ॥"

छान्दोग्योपनिषदाह—

"न स पुनरावर्तते न स पुनरावर्तते ।"

"क्षीरात् समुद्धृतं त्वाज्यं न पुनः क्षीरतां व्रजेत् ।
पृथक्कृतस्तु कर्मभ्यो नात्मा स्यात् कर्मवान् पुनः ॥"

"यथा नीता रसेन्द्रेण धातवः शातकुम्भताम् ।
पुनरावृत्तये न स्युस्तद्वदात्मापि योगिनाम् ॥"

इत्यादयोऽपि सन्ति विपश्चिद्वाचः ।

कर्मरूपाणां राग—द्वेष—मोहमलानां तत्प्रवर्तितनवनवकर्मबन्धादि-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

सन्ततीनां चानादियोगो वर्तते जीवस्य। उच्छिन्नेषु तेषु मलेषु कर्मबन्धा विरमन्ति, विद्रवन्ति च बद्धपूर्वाणि कर्माणि। इयं हि मोक्षसिद्धिः।

स्वरूपेण सच्चिदानन्दमयशुद्धमात्मानं राग–द्वेष–मोहमलाः कथं लगेयुः ? इति प्रश्नोद्भवनं सम्भवति। परन्तु ते मला आत्मनि-अमुकसमये लग्ना इति तु वक्तुमशक्यमेव। एवं ह्युच्यमाने, यदा ते आत्मानमाश्लिष्टास्ततः पूर्वमात्मा निर्मल एव सिध्यति, ततश्च निर्मलात्मनि तल्लगनं नोपपद्यते। निर्मलेऽप्यात्मनि यदि तदाश्लेषः स्यात्, तदा भविष्यत्काले पूर्णप्रयत्नतो मुक्तेः प्राप्तेः पश्चादपि पुनस्तदाश्लेष आपद्येत। अर्थात् निर्मल–विशुद्ध–मुक्तात्मनामपि पुनरपि तत्संश्लेष उपतिष्ठेत। यदि चैवं स्यात् तर्हि मुक्तिनाम तत्त्वमुच्छिद्येत। अत आत्मनो मोहमलो ( राग–द्वेष–मोहमलाः ) युज्यतेऽनादिरेव प्रतिपत्तुम्।

अनादिमृत्सम्बद्धसुवर्णस्योज्ज्वलचाकचिक्यस्वभावो यथाऽऽवृतोऽस्ति, तथा आत्मनोऽपि शुद्धचैतन्यस्वरूपमनादिसंयुक्तकर्मप्रवाहावरणेनाऽऽवृतमस्ति। अत एव तस्य भवचक्रेऽनेकानेकदुःखविडम्बनास्पदं भ्रमणं प्रवर्तते। मृन्मलीमसं सुवर्णं यथा विशिष्टप्रयोगेण मृद्विमुक्तीभूयोज्ज्वलितं भवति, यथा वा मलिनदर्पणो निर्णेकेनोज्ज्वलो भवति, तथा आत्मलग्नसकलकर्ममलसमुच्छेदेन आत्मा उज्ज्वलो भवति, स्वविशुद्धस्वरूपे प्रकाशमानो भवति।

ननु यद्यनादिरात्म–कर्मसंयोगः, तर्हि तस्य नाशो न स्यात्, अनादेर्नाशाभावात्। न। आत्मना सह नवनवानि कर्माणि संयुज्यन्ते, प्राञ्चि च विशीर्यन्ते, अतो न काचिदपि कर्मद्रव्यव्यक्तिरात्मसंयोगमनादिरूपमाबिभर्ति। कर्म बध्यते–संयुज्यते इति तत्संयोग

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

आदिमानेव, अतस्तेनाऽवश्यमपसर्तव्यम् । प्रत्येकं कर्मद्रव्यव्यक्ति-संयोगा आदिमन्तः, अथ च तत्प्रवाहोऽविच्छिन्नं वहमानोऽनादिरेव । अनादिरप्यसौ प्रत्येकमादिमतां विशरारूणां च कर्मसंयोगानामस्ति, अतः शुक्लसमाधिपूतविशुद्धचारित्रबलेन नवकर्मबन्धनिरोधसमेत–प्राक्कर्मप्रविलापनं शक्नोति भवितुम् । इत्थं सर्वकर्मावरणानां समूल-घातं हननं कृत्स्नकर्ममुक्तीभवनं वोपपद्यते आत्मनः ।

किञ्च मनुष्यस्थितिमुत्पश्यन्तो जानीमहे तेषां राग–द्वेषा न समानमात्राः, किन्तु तारतम्यभाज इति । एकस्यापि जनस्य राग–द्वेषौ कदाचित् तीव्रौ भवतः, कदाचिच्च मन्दौ । एतौ चोत्कर्षा-ऽप-कर्षौ राग–द्वेषयोर्न भवेतां निर्हेतुकौ । अतः, उत्कर्षापकर्षगामि वस्तु येन विरोधिनाऽपकृष्यते तस्य बले पूर्णरूपेण प्रादुर्भवति तद् वस्तु पूर्णतया नश्यति, यथा पौषमासशीतं बालरवेर्मन्दमन्दतापेनापचीयमान-मधिकतापोपनिपातेन सम्पूर्णं विलीयते, इति नियमानुसारेण राग-द्वेषौ येनाऽऽध्यात्मिकशुभभावेनापचीयेते तस्य उत्कर्षे पूर्णतामागच्छति सम्पूर्णमर्हतो विनशितुम् । शुभभावनाबलेन मन्दीभवन्तौ रागद्वेषौ आत्मयोगविकासानुसारेणोत्तरोत्तरमपचीयमानौ तस्मिन् विकासे परां काष्ठामधितिष्ठति समूलघातं हतौ भवतः । हतयोश्च तयोर्वीतराग–निर्मोहीभूतस्सपद्येव सर्वाऽविद्यातः समग्रज्ञानावरणतो वा विमुक्ती-भूय परमतत्त्वालोकसम्पन्नो भवति ।

इत्थमात्मा कृत्स्नावरणविमुक्तीभूय परमोज्ज्वलस्वरूपमधिष्ठितः परमात्मा भवति । स एव हीश्वरः । स्वरूपतो हि प्रतिप्राणि आत्मा परमात्मा ईश्वर एव ।

यदभ्यधिषि कल्याणमार्गमीमांसायाम्—

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

परं तत्त्वं ब्रह्म प्रणिगदति वाचोपनिषदां
तदात्मा, नो अन्यत् स च परमचिद्वीर्यमुदितः ।
स्वरूपादेतस्मात् प्रकृतिसहजात् सोऽस्ति भगवान्,
अविद्यासम्मोहावरणभरितः संसरति तु ॥

## भगवदुपास्तिः ।

परमात्मा ईश्वरो वा वीतरागो जगदनुबन्धिक्रियाव्यापारविरहितः सन्नप्यर्हत्युपासनाम् । न च तदुपासना तं प्रीणयितुम्, किन्तु स्वमनो विशोधयितुम् । समग्रदुःखमूलभूतौ रागद्वेषावुत्सारयितुं तद्रहितस्य परमात्मनो भगवत उपयोग्येव ह्यवलम्बनम् ।

यदवोचं भक्तभारती-स्तोत्रे—

पूर्णात्मोदय-दैवतस्य परमं शुद्धोज्ज्वलं जीवनं
स्मृत्वा तद्गुणराशितः स्वयमुपादातुं किमप्यात्मनि ।
म्लानिं मानसिकीमपासितुमथो आध्यात्मिकीं प्रेरणां
प्राप्तुं साधयितुं शमं समुचितं भक्त्यात्मकालम्बनम् ॥

चित्तपरिणामाः खलु निमित्तयोगानुसारेण भवन्ति, परिवर्तन्ते चास्मदादीनाम् । सत्सङ्गे हि चित्तं शुक्लं भवति, विपरीते च विपरीत-रूपम् । रूपवतीं रमणीं पश्यतोऽन्यो भावो भवति, स्नेहास्पदं च पुत्रं मित्रं वाऽन्यः, प्रसन्नात्मनि मुनौ चाऽवलोकनपथमुपगच्छति प्रादुर्भवति प्रसन्नता शान्तिमयी, इति निखिलजनप्रतीतिसिद्धम् । सज्जनसंगतिः सुसंस्कारमुपजनयति, दुर्जनसंगतिश्च विपरीतम् । अत एव सत्सङ्गस्यावश्यकत्वमातिष्ठन्ते धीराः । प्रवर्तते च लौकिकी श्रुतिरपि–" सोबत असर " [ यथा सङ्गस्तथा रङ्गः ] । एवं सति

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वीतराग-भगवतः सत्सङ्गः कियान् क्षेमङ्करः स्यात्! तत्सङ्गश्च तस्य स्मरणं स्तवनं भजन–चिन्तनं वा। तदभ्यासबलमात्मनि रागद्वेष-वृत्त्युपशमरूपपरिणामाय सम्पद्यते परमप्रसादरूपाय।

परमैश्वर्यो वीतरागो भगवान् पूजकस्य सकाशान्न किमप्यभि-काङ्क्षति, नापि तेन किमप्युपक्रियमाणो भवति। पूजकः केवलस्वहिताय पूज्यं परमात्मानं पूजयति, आसादयति च स्वसमीहितं तदवलम्बन-योगमहिम्ना।

अभणिषं च भक्तभारत्याम्–

प्रभो! रागाद् रोषात् त्वमसि बहिरेव ध्रुवतया
तथापि त्वद्भक्तस्त्वदनुगमनस्वादरसिकः–।
उपैति स्वाभीष्टं विशदितमनस्सत्त्वबलतो
मनोऽधीनं सन्तो ह्यभिदधति पुण्यं च दुरितम्॥

न किञ्चित् कुर्वाणस्त्वमसि न ददानः किमपि वा
तथापि त्वोपास्याऽचलबलमनाः पुण्यचरितः।
निजं प्रेयः श्रेयः समुपलभते तत् खलु विभो!
त्वदेकाग्रोपास्याप्रभवसुकृतोत्कर्षविहितिः॥

यथाऽग्निसामीप्यं भजमानस्य शीतं स्वत उड्डीयते, परन्तु नासौ तदर्थं कमप्याकारयति, न वा प्रसह्य औष्ण्यं ददाति; तथा वीत-राग-भगवतः सद्गुण–प्रणिधानेन रागादिदोषरूपं शीतं स्वतः पलायितुं प्रवर्तते, आत्मविकासरूपं च फलं सम्पद्यमानं भवति। इत्थं भगवदु-पास्तिफलमेतत् स्वाध्यात्मिकप्रयत्नतेजसा समुपलभते उपासकः।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

## ज्ञान-भक्ति-कर्माणि ।

सुख-दुःखानां कारणभूतं कर्म मनोवृत्त्यधीनम्, इति हि सर्वपार्षदम् । अतस्तद्वृत्तीनां शुभीकरणस्य, तद्द्वारा चात्मविकासस्य सुखशान्तिसम्पादनस्य च साधनमस्ति भगवदुपास्तिः । भगवन्निष्ठया उत्तमोत्तमादर्शनिष्ठया वा सच्चरितीभवनेऽस्माभिः प्रयतितव्यमस्ति ।

भक्तिपात्रवैशिष्ट्यावबोधानन्तरं तद्गुणविभूत्याकर्षणोद्भूतपूज्यत्वभावो भक्तिः । अतश्चासौ ज्ञानाश्रिता । क्षीरे यत् स्थानं सितायास्तद् भक्तेरस्ति ज्ञाने । सुज्ञो भक्तो भगवन्तमनुसरति, तदाज्ञामनुपालयति, तन्मार्गे विहरति, तस्मिंश्चार्पितो भवति । असौ स्वोपास्यपादानुसारीभूय तद्वद् भवितुं प्रयतते-तद्वत् सद्गुणी, सच्चारित्री, सत्कर्मा । प्रयतमानश्चोत्तरोत्तरमभ्युद्गच्छन्नात्मविकासस्य परमकल्याणरूपं चरमशिखरमधिष्ठाय भगवान् भवति । इत्थं भक्तो भगवान् भवति । समर्पणं ज्ञानमात्रेण न भवति, किन्तु ज्ञानोपबृंहितेन ज्ञानवीर्यरूपेण भक्तितेजसा । इत्थं ज्ञानसंयुक्तभक्तिः, भक्तिसंयुक्तज्ञानं वा कर्मणो [ चारित्रस्य जीवनविधेर्वा ] निर्मातृ भवति । इत्थं ज्ञान-भक्ति-कर्माणि सम्भूय, एकरसीभूय भगवद्भावमाविष्कुर्वन्ति ।

## सम्यग्दर्शन-ज्ञान-चारित्राणि ।

दर्शन-ज्ञान-चारित्रत्रयं सम्यग् भवेद् यदा ।<br>
तदा भवत्यसौ मार्गो मुक्तेः परमनिर्वृतेः ॥

इह दर्शनं श्रद्धा । सा सम्यगवबोधपूर्विकैव कल्याणाङ्गम् । इदं सम्यग्दर्शनम्, अर्थात् सम्यक्श्रद्धानं यदाऽऽत्मतत्त्वविषयं चारित्र-[ चारित्रक्षेमङ्करत्व ] विषयं वाऽभ्युदेति तदाऽऽत्मविकाससाधन-

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

શ્રી યશોવિજયજી જૈન ગ્રંથમાળા • ભાવનગર •

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com